# Shri Skanda Vedapada Stotram

# श्रीस्कन्दवेदपादस्तोत्रम्

## Document Information

Text title : Skanda Veda Pada Stotram

File name : skandavedapAdastotram.itx

Category : subrahmanya

Location : doc_subrahmanya

Proofread by : Preeti N Bhandare

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# श्रीस्कन्दवेदपादस्तोत्रम्

श्रीमहागणाधिपतये नमः ।
श्रीगुरुभ्यो नमः ।
पुरा स्कन्दो महाबाहुः प्राप्य कौमारजाङ्गलम् ।
कुमाराद्रि समासाध्य जित्वा तारकमोजसा ॥ १॥

वासुकिं भुजगेन्द्रं च कृत्वा पूर्णमनोरथम् ।
स्वांशं तस्मिन् प्रतिष्ठाप्य धारातीरे मनोरमे ॥ २॥

देवभूदेव सङ्घैश्च देवानीकयुतो वशी ।
सुरेन्द्रयाज्ञया तस्य कन्यां स्वीकृत्य तत्रहि ॥ ३॥

स्वामिकार्तिकमासाद्य तां विवाह महोत्सवैः ।
तत्रस्थितं मोदमानमानसं मणिमन्दिरे ॥ ४॥

देवसेना पतिस्वाङ्गहर्षं चापि सुधाकरम् ।
स्वच्छस्फटिक निरमाणदिव्यसिंहासनेस्थितम् ॥ ५॥

सर्वक्षेत्रोत्तमे नित्यं भोगमोक्षफलप्रदे ।
महासारस्वतेपीठे स्वगणे स्वामि कार्तिके ॥ ६॥

दृष्ट्वातुपरमानन्दयुताः सेन्द्रायुताः सुराः ।
कृताञ्जलि पुटाः सर्वेतुष्टुवुर्मुदितास्तदा ॥ ७॥

वरोत्पलस्त्रक्करकारविन्द संशोभिहस्तां कुचभारनम्म्राम् ।
बिम्बाधरां रक्तनखां तलोदरीं हरीन्द्रमध्यां गजमन्दगामिनीम् ॥ ८॥

भृङ्गालकां श्यामलदेहकान्तिं मुक्तावलीभूषितकण्ठभागाम् ।
महार्हवस्त्राभरणैरु पेतां विद्युत्प्रभां कोमलपादपद्माम् ॥ ९॥

राकाशरश्चन्द्रमुखीं मनोज्ञां मन्दस्मितां कुन्ददतीं सुनासाम् ।
तत्र स्पुरन्मौक्तिकचारुकान्तिं प्रभातिरस्कारकृतेन्दु मं(द) (ड) लाम् ॥ १०॥

प्रियसमालिङ्गनजात-सम्भ्रमभ्रमद्विलासोत्थित रोमहर्षणाम् ।
स्रवत्सुधा-सागरपूर्णचन्द्रकटाक्षकल्लोल विलासविभ्रमाम् ॥ ११॥

तां देवसेनां परिरभ्यं गाढं लज्जानता मुन्नमयन् कराब्जैः ।
वचोभिरीर्ष्या प्रणयप्रकोपैः सम्मानयन्हास्यसमन्विताभि ॥ १२॥

कथोरमार्ताण्ड सहस्र कान्तिमत्कीरटभाभासिद दिग्वधूमुखम् ।
सुच्छरचन्द्रमरी चिदिक्कृत प्रदीप्तसौम्यननमण्डलं प्रभुम् ॥ १३॥

चलत्कपोलान्त विराजितोज्ज्वलस्फुरत्सुमुक्तामणिवर्यकुण्डलम् ।
प्रहर्ष कृद्धक्तचरोमण्डलं स्मेरास्यजैवातृककौमुदी कं (मुखं) ॥ १४॥

बिम्बाधरं सुन्दरकम्बुकन्धरं दिव्यायुधोद्यद्भुजदण्डम म्भतम् ।
आजानुबाहुं सुविशालवृक्षसं पीनोन्नतांसं विमलाङ्गकान्तिम् ॥ १५॥

गम्भीरनाभिं सुकटिप्रदेशं सुजानु जङ्घं मृदुपाद पल्लवम् ।
महारत्नाङ्गदषड्किरीटं द्विषड्भुजं चित्रमयूरवाहनम् ॥ १६॥

तेजः क्षमाबुद्धियशोभिरेव समं धरित्री गुरुशुक्रसूरैः ।
गजाख्यसिंहानन शूरपद्मसतारकाग्निप्रलयाम्बुराशिम् ॥ १७॥

रक्षो-गणादिष्ठित पारिसंस्थतद्वीरमाहेन्द्रसुदुर्गभेधनम् ।
गन्धर्वगीर्वाण सुसिद्धसाध्य विद्याधरैरप्सरोभीश्च सेव्यम् ॥ १८॥

मुनीन्द्र पद्मासन वारिजाक्ष भूतेशमुख्यैर्वर चारुकन्दम् ।
धारासरित्तीरविराजमाना कुमारशैलाग्र सुदिव्यधाम्नि ॥ १९॥

स्थितं स्वशक्त्यापरया सुरूपया तं देवसेनासहितं वरेण्यम् ।
मग्जाड्यहन्तारमनन्तशक्तिं षडाननं वाञ्छितदा नदक्षम् ॥ २०॥

गौरीवरानङ्करं सुचारुवेषं सुविद्याप्रदमाश्रितानाम् ।
नित्यान्नदाने सिरुतं महोग्रकुष्ठादिहन्तारमनादिनिर्गुण ॥ २१॥

देवाङ्गनाभिर्मुनिकन्यकाभिर्नीराजितं मङ्गलमङ्गलाङ्गम् ।
बिलान्तरालस्तितवासुकीन्द्रे स्वांशेन तिष्थन्तमुदार विक्रम ॥ २२॥

सर्वेश्वरं त्रिपुरसुन्दरमादिदेवं जन्मातिगं भवभयापहरं वरेण्यम् ।
गङ्गासुतं गिरिसुतां मुदामावहन्तं वन्दामहे मयभीष्टदमाशुद्धै ॥ २३॥

इति स्तुतं देवगणैरावाङ्मनसगोचरम् ।
कालं कलयतां स्तुत्यं स्तुतिरूपं स्तुतिप्रियम् ॥ २४॥

प्रणम्य दण्डवद्भूमौ वेदान्तस्तवमुत्तमम् ।
पठेदिदं स्वान्तपद्मे चिन्तयन् स्वन्द वीश्वतम् ॥ २५॥

गजाननं महात्मानं सुधाकुम्भं वराङ्कुशौ ।
बिभ्राण मोदक हस्तृर्नमस्कृत्यकिरीटनम् ॥ १॥

श्रीपतिस्तुतचारित्र श्रीमत्सुन्दर विग्रह ।
श्रीषडाननर्सेश श्रीयं वासयमेकुले ॥ २॥

पुरन्दरादिसंसेव्यपादपद्मदयानिधे ।
पुलिन्दकन्या रमण पुरुत्राह्यसिविश्रुतः ॥ ३॥

वीतरागाश्चमुनयो हृदम्बुजपुटेस्थितम् ।
सर्वज्ञं सर्वगं स्कन्दं सदापश्यन्ति सूरयः ॥ ४॥

यमाश्रित्य च गीर्वाणा युधि शत्रून्निहन्ति च ।
आलम्बन्ति स्वपदवीं तिष्ठन्तिस्वादु रातयः ॥ ५॥

द्विषड्भुजगदाखेट पाश खड्गादि हेतिभिः ।
विद्रावयाशुमेशत्रून् सङ्ग्रामेरिपुसङ्कटे ॥ ६॥

तापत्रय महावह्नि ज्वालासन्तापितं हि माम् ।
तथा कामादि षड्वर्गैराप्यायस्वसमेतुतेः ॥ ७॥

अणोरणी यां समजमेकं धातरमीश्वरम् ।
मयूरवाहनं देवं विपश्येमनृचक्षसः ॥ ८॥

मन्दस्मितमुखाम्भोजं युवानं क्रौञ्चभेदिनम् ।
समाश्रयित्वा विबुधा च मुदप्रमुदाऽसते ॥ ९॥

महासाम्राज्यपीठस्थं राजराजनमद्युतिम् ।
क्षिप्रमालोकयिष्यामः सुगन्धिं पुष्ठिवर्धनम् ॥ १०॥

कायेनमनसावाच नतिचिन्तनकीर्तनैः ।
सदारा हृष्टमनसश्चोपास्मैगायतानरः ॥ ११॥

नमोहिरण्यवर्णाय हिरण्यस्यन्दनायच ।
नमो हिरण्यगात्राय नमोहिरण्यबाहवे ॥ १२॥

दण्डिताखिलदैत्यौघः खण्डिताखिलबन्दनः ।

वर्धितानुत भक्तौघः शन्नः करत्यर्वते ॥ १३॥

गिरिजासुकुमाराय वराभयङ्कराय च ।
भद्रदाय वरेण्याय विश्वरूपायवै नमोनमः ॥ १४॥

अपराधान्य नन्तानि कृतानि बहुधा मया ।
मदीय इति मत्वातं रक्षस्वमाञ्जदेपदे ॥ १५॥

दारि द्र्याम्बुधि मग्नं मां शम्मेनस्व पाणिना ।
समुद्धृत्यच गाङ्गेय कीर्तिमृद्धिं ददातुमे ॥ १६॥

आन्यत्सर्वं परित्यज्य पदाज्जयुगलं तव ।
समाश्रीतोऽस्मि भगवान् कक्षाणोब्रह्मणस्पते ॥ १७॥

यश्चव्योसित्वमेवेश विधिमन्त्रपुरस्कृतम् ।
नियतं हि द्विजात्यग्रैरस्मिन्यज्ञेस्वध्वरे ॥ १८॥

लोतापस्मारकुष्ठाहिराजचोराद्युपद्रवान् ।
कृतिकातनयास्माकं भिन्धि द्वेषः सहस्कृतः ॥ १९॥

त्वत्सेवानिरतानां हि भवन्त्सा खण्डलश्रियः ।
अतस्त्वामेव मुनयः सञ्ज्ञानाना उपासते ॥ २०॥

यज्ञानां फलदाता त्वं यज्ञोपकरणानि च ।
त्वं होता यजमानश्च त्वं सोमासि सत्फतिः ॥ २१॥

देवसेना समेतस्त्वं क्रिडसे मणिमन्दिरे ।
स्वगणैश्च महासेनयत्रतत्परमं पदम् ॥ २२॥

भ्राजद्गण्डस्थलोद्धाम कुण्डलोज्ज्वलि ताननम् ।
बिभ्रतखण्डेदुनयम्पश्येम शरदः शतम् ॥ २३॥

प्राप्यतारकदैत्येन्द्रोद्भव सागरतारकम् ।
संसारसागरं तीर्त्वा देवो देवेभिरागमत् ॥ २४॥

स्तुत्वा महान्तं महतोह्यणी यांसमणोरपि ।
मोदिष्यामोवयं नित्यं प्रजया चधने न च ॥ २५॥

बालक्रीडां विकुर्वाणो बालभास्करदीप्तिमान् ।
बालेन्दुमन्दहासेन चात्यायन् बहुलं तमाः ॥ २६॥

भोगेच्छूनां सदाराणां यजतां श्रद्धया गुहम् ।
भवन्त्यस्यैवकृप या यावेन्त्यःपृथिव्यां भोगाः ॥ २७॥

जगत्कुटुम्भी देवेशो दीनसंरक्षणक्षमः ।
पाक स्रष्टार्थं संहर्ता येः विजानन्ति ये चन ॥ २८॥

येषां हि कुलजातेन स्कन्दपादाश्रितेन च तरन्ति ।
वरकाम्भोधिं शश्वत्पुश्रेण पितरः ॥ २९॥

जनानामुतदेवानां स्मृतेस्तव पदाब्जयोः ।
सम्प्राप्तौ भोगमोक्षा च किमश्व श्रूणि किं तपः ॥ ३०॥

वयमेतेन सततं गमिष्यामः कृतार्थ ताम् ।
श्रद्धया केवलेनैव यो विश्वाभिविपश्यतिः ॥ ३१॥

पुरा कृतान्यशेषाणि पातकानि महान्ति च ।
विनाश्य पालयविभो गायेत्वानमसा गिरा ॥ ३२॥

अनाथं दीनमापन्नं कृपाब्धे मां विलोकय ।
अचिन्तयित्वा सेनाने यन्मना दुष्कृतं कृतम् ॥ ३३॥

देवसेनापतिस्त्वं हि देवसे नायतो वशी ।
अतएव महासेनो भूरिदाह्यसि श्रुतः ॥ ३४॥

कार्तिकेय महाबाहो कृत्तिवासःप्रयङ्कर ।
कृत्तिवासो विभिन्नानां ह्यप्राप्यमनसा सह ॥ ३५॥

तां नमामि महादेवीं कार्तिकेयशु भाङ्कणाम् ।
शक्तिं भद्रां भगवतीं सर्वभूतनिवेशनीम् ॥ ३६॥

संहृत्यविश्वं सचरा चरं च कल्पावसाने परया स्वशक्त्या ।
सङ्क्रीडयंस्तिष्ठति गूढमूर्तिरम्भस्यपारे भुवनस्य मध्ये ॥ ३७॥

त्वत्सन्निधानत्त्री जगज्जनित्री सृजत्यवत्यति च जीवसङ्घान् रजस्तमः ।
सत्त्वगुणैरजस्त्रं भूयिष्ठान्ते नम उक्तिं विधेम ॥ ३८॥

त्वत्समस्त्रिषु लोकेषु नान्यस्तिष्ठति निश्चितम् ।
वर्णितुं महिमानन्ते सपूर्वेनापरे जनाः ॥ ३९॥

त्वमेव देवदेवेश जगन्निवास कूटस्थात्मा पुरुषः पुराणः ।
त्वमेव यत्सर्वं गतं हि वस्तुह्यागुहायां निहितोस्य जन्तोः ॥ ४०॥

लास्यासक्तस्य गिरिजारमणस्यान्तिके चरन् ।
प्रदोषे शिवयोः प्रीतिं जनयन्त्रोचनादिवः ॥ ४१॥

तं वन्दे निष्कलं शुद्धमादि कर्तारमीश्वरम् ।
यतश्च यजुषा सार्धमृचः सामानि जज्ञिरे ॥ ४२॥

एनमाश्रित्र जित्वासन् सङ्गरेयुद्धदुर्मदान् ।
दिवितारेति मुदिता इन्द्रज्येष्ठा मरुद्गणाः ॥ ४३॥

यत्तद्ब्रह्म जगद्योनिः सर्वव्यापी सनातनः ।
सकाणस्वेच्छय शम्भोरभ्राद्वृष्टिरिवाजनि ॥ ४४॥

त्वमन्तरात्मा सर्वभूतेषु चैकस्तथानलिप्तो खमिवाप्यचिन्त्यः ।
नित्यानित्यैश्चेतनाचेतनात्म ह्यणोरणीयान्महतो महीयान् ॥ ४५॥

जगत्कर्ते दिनगोप्त्रे भवहं त्रेऽसुरद्रुहाम् ।
कामदात्रे विश्वकर्त्रे गोत्राणां पतये नमः ॥ ४६॥

तस्मैकुमाराय कृपाकराय लोकैकधा त्रेऽखिलधर्मगोप्त्रे ।
द्विषङ्गुजायास्तु नमः परस्मै यस्मात्परन्ना परमस्ति किञ्चित् ॥ ४७॥

तिरस्कृतानैकसहस्त्ररश्मिरत्नाड्य दिव्याभरणैरुपेतम् ।
माणिक्यवैडूर्यकिरीटजुष्टं विभुं चिदानन्दमरूपमद्भुतम् ॥ ४८॥

पुरासुपर्वाप्सरसोरगेन्द्र भूदेवसं घेरनुगीयमानः ।
त्वमेव मां भीषणमृत्युवक्त्रात्पाहि पश्चात्तादुतवा पुरस्तात् ॥ ४९॥

पादपङ्कजभृङ्गेभ्यो महद्भ्यश्च नमो नमः ।
तेभ्यो नमस्ते गणेभ्यो घोरेभ्योथ घोरेभ्यः ॥ ५०॥

तिलेषु तैलं दधिनीव सर्पिस्त्र्योतस्याश्राग्निररण्योर्यथा हि ।
तिष्ठत्यात्मा सर्वभूतेषु गूढो गर्भैइव सुधितोगर्भिणेषु ॥ ५१॥

त्वं भूमिरापो ज्वलनं हि वायुर्नभोदिशश्चाप्यथ चन्द्रसूर्यौ ।
मरुद्गणाश्चैव सरीसृपाश्च ह्यथो दिव्यः सुसुपर्णो गुरुत्मान् ॥ ५२॥

त्वय्येव हि जगजातं त्वयि सर्वं प्रतिष्ठितम् ।
त्वय्येव विलयं यान्तियत्किञ्च जगत्यां जगत् ॥ ५३॥

यमेव नित्यं मुनयो यजन्ति गायन्ति गन्धर्वगणाः सुसाध्या ।

गृणन्ति चैव श्रुतयोयमाद्यमादित्यवर्णं तमसः परस्तात् ॥ ५४॥

यदक्षरं परमं वेदवेद्यं सर्वस्य बीजं जगतां निधानम् ।
सच्चासच्चव्यापकं चित्स्वरूपमेकं सद्विप्रा बहुधा वदन्ति ॥ ५५॥

कलिकल्मषहन्तारं दुरितध्वान्तभास्करम् ।
एनं हित्वा षडात्मानं तेंऽधन्तमः प्रविशन्ति ॥ ५६ ॥

कृपालुस्त्वादृशोनास्ति मादृशो नास्ति पापभाक् ।
पतन्तन्निरयाम्भोदौ रक्षा राजन्नघायतः ॥ ५७॥

श्रियं सुविद्यां सुकलत्रमुर्वीं प्रजाः पशून् भूरियशोर्थसिद्धिम् ।
प्राप्तुं यदीच्छा तव भक्तिरेव ह्ययं पन्थाऽनुवित्तः पुराणः ॥ ५८॥

स्तुतिभिर्न्नेति भिर्विचिन्तनैः तवसन्दर्शनकीर्तनैलल्पैः ।
सुधियोऽपि भजन्ति केवलं दीर्घायुत्वाय शतशारदाय ॥ ५९॥

आनन्दरत्नाकर शितदीधितिं गोणौघसद्रत्न करण्डमध्यगम् ।
मुक्ताफलं तच्छर जन निर्मलं तस्य धीराः परिजानन्ति योनिम् ॥ ६०॥

असाध्यमप्यस्य कृपाकटाक्षात्साध्यं हि लोके प्रवदन्ति सन्तः ।
पुरैनमाश्रित्य हि देवदेवेस्त्वष्टुर्ग्रहेऽभिबत्सोममिन्द्रः ॥ ६१॥

मध्येबहिर्वाप्यथ चान्तराले दिक्ष्वन्तरिक्षे बिलमन्दिरे च ।
भूमौ तथा करतले विदिक्षु नहीन्वस्यप्रतिमानमस्ति ॥ ६२॥

यद्ब्रह्म यच्चाक्षरमद्वितीयमनौपमं वाङ्मनसोविदूरं
यदेतदव्यक्तमतीन्द्रियं तत्परमं पदमवभाति भूरि ॥ ६३॥

यस्यचित्तं त्वत्पदाब्जे सततं निश्चलं विभो ।
नाप्राप्यमस्ति सुधियस्तस्य देवाऽसन्वशे ॥ ६४॥

नौमि सदार्थधातरं गोप्तारं त्रिदिवौकसाम् ।
हन्तारं सर्वशत्रूणां जेतारमपराजितम् ॥ ६५॥

यद्विदित्वापरं चान्यत् ज्ञातव्यं नहि किञ्चन ।
इति शुश्रुमधीराणां येनस्त्वद्विचचक्षिरे ॥ ६६॥

त्वमेव वेद्योऽसि समाधिनिष्ठैःत्वमेव चेजोऽपि तथाध्वरेषु ।
त्वमेवपूज्योऽसि समस्त नीर्जरैस्त्वम्ब्रह्मारयिविद्ब्रह्मणस्पते ॥ ६७॥

अग्निर्यथैकोभुवनं प्रविष्टो रूपं रूपं प्रति रूपो बहिश्च ॥ ६८॥

सूर्यो यथा सर्वभूतेषु चक्षुर्नलिष्यते चाक्षुषैर्बाह्य दोषैः ।
एकस्तथा सर्वभूतान्तरात्ममलिप्य ते चाक्षुषैर्बाह्यदोषैः ॥ ६९॥

एकोवशि सर्वभूतान्तरात्म चै कं रूपं बहुधा यः करोती ।
तमात्मस्थंयेनु पश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ ७०॥

सुकाम दोग्ध्रीह्यमृतप्रवर्षणी भवत्कृपायाश्रित कामरूपिणी ।
अस्मासु नित्यं सकलार्थदायिनी सा वर्धतां महते सौभगाय ॥ ७१॥

स एवमागयणसन्निकृष्टः शरीरूवस्थाय करोति सर्वम् ।
स सर्व भूतेन्द्रिय संहतिस्थः ससर्वज्ञः सर्वमिदं प्रपश्यति ॥ ७२॥

त्वदाश्रया महामया सैव विश्वं मिनिर्ममे ।
ततोन्यत्परमाणुर्वा नेह त्वानास्ति किञ्चन ॥ ७३॥

त्वमन्तरात्म पञ्चमिशात्परश्च त्वामुत्तमः पुरुष परमात्मा ।
ह्यभिन्नः सनातनः प्रेर्यमाण एको देवः सर्वभूतेषु गूढः ॥ ७४॥

यदादित्ये यच्छशाङ्के यदग्नौयद्योम्नि भूमौयच्छवसनेयदप्सु ।
यद्यजमाने निष्ठितं सर्वगु यत् य इत्तद्विदुस्त इमे समासते ॥ ७५॥

स्वेच्छया क्रीडमानस्सन्व्याप्यातिष्ठति सर्वगु ।
साक्षीप्रकृत्या संयुक्तो भर्गो देवस्य धीमहि ॥ ७६॥

स्तोतुं स एव सर्वात्मादष्टुं ज्ञातुं तदर्चनम् ।
कर्तुं सज्जनसंसर्गं धियोयोनः प्रचोदयात् ॥ ७७॥

ऋङ्मण्डलं यद्यजूगंषि प्रतीकं सामान्युस्राभ्रान्तितमोनिहन्ताम् ।
विभ्राड्बृहत्तत्परमार्थरूपमादित्यवर्णं तमसः परस्तात् ॥ ७८॥

सुतेजस्त्र कृष्णशुक्लाद्यनेक भेदान्माय जीव सङ्घाननेकान् ।
त्वदाधारा तृत्प्रतिबिम्बितासती यदक्षरं पञ्चविदं समेति ॥ ७९॥

यदक्षरं पञ्चामृतं ब्रह्मवेद्यं छन्दोमयास्यं प्रणौमि द्वादशारम् ।
सप्तचक्रं वियति भ्राम्यमाणमेकं सन्तं बहुधा कल्पयन्ति ॥ ८०॥

सूते जनानामखिलार्थसिद्धिं या स्कन्दशक्ति कृपया मनोज्ञा ।
अभाति सा कल्पलतेवे शश्वत् प्रियं सखायं परिषस्वजाना ॥ ८१॥

तां देवसेनां तरुणार्कभासां कुन्देन्दु मन्दस्मितशोभिवक्राम् ।
स्मरामि नित्यं कनकाभगात्रां वचोविदं वाचमुदीरयन्तीम् ॥ ८२॥

पुरा महत्माभगवान्घटोद्भवः स्तोत्रेण संसुत्य षडास्यमादरात् ।
भूत्वा मुनीनां प्रवरः समाहितश्चि कितुषी प्रथमा यज्ञियानाम् ॥ ८३॥

विद्यावित्तं यशस्वर्गरोक्षौचायूषिनः सदा ।
विजयं देहि सेनानेस्त वामत्वास्वाध्यः ॥ ८४॥

त्वया सम्प्रेर्यमाणोहभक्त्या स्तौमि हरात्मज ।
पाहिनः कृपया देव सेनानिभ्यश्च वो नमः ॥ ८५॥

दुःस्वप्न दुर्निमित्तोत्थभयं शमय शाङ्करेत्वम् ।
हि पक्षिमुखाच्चापि भद्रन्नःसर्वतो वद ॥ ८६॥

निहत्य तारकं सङ्घोसपुत्रामात्यबान्धवम् ।
कुमारशैलशृङ्गाग्रमरोहन्नुत्तरां दिवम् ॥ ८७॥

भवामयनिहन्तापि कुष्ठरोगातुरांस्तथा ।
रक्षिष्यसीतिश्रुणमो हरिमाणं च नाशय ॥ ८८॥

यत्रोच्छिष्टानुलेपेन पादसङ्घैर्नलिप्यते ।
सुब्रमण्यस्य महिमाकस्तद्वेदद्भुतम् ॥ ८९॥

सर्वेशमाश्रित्य तथान्नमुत्तमं जीवन्ति जीवा इतिदानलीलया ।
धातुः फलं बह्वितिदर्शयन्नसावधारयद्धरितोभोजनम् ॥ ९०॥

दारापगोपान्त कुमारभूभृतिस्थित्वान्नदानं प्रकरोति सन्ततम् ।
आज्ञापितं तेन गुहेन चैवं केवलाघो भवति केवलादी ॥ ९१॥

विशोषणाय दैत्येन्द्र महाप्रलयवारिधेः ।
निर्याहीत्य ब्रुवन् देवा जयतामिवदुन्दुभिः ॥ ९२॥

आम्नाय पादप्रहितेन संस्तुतः स्तवेनचानेनहुताशभूर्गुहः ।
तुष्ट सदा दैवत दैवतः स्वयवंस्मभ्यं तद्वत्तनयद्वयीमहे ॥ ९३॥

इमं स्तवमधीयानः स्कन्दभक्तियुतोवशी ।
प्राप्येह सकलान् कामान् घोरमृत्यु भयं हे ॥ ९४॥

स्वस्ति श्रीस्कन्दवेदपादस्तोत्रम् ।

Proofread by Preeti N. Bhandare

*Shri Skanda Vedapada Stotram*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*